**भारवेः रचनारीतिः/रचनाशैली।**

कालिदासोत्तरकवीनां मध्ये महाकविमौलिमुकुटमणिभूतः किरातार्जुनीयप्रणेता महापुरुषः कविः भारविः। एकेनैव काव्येन जगति सर्वत्र तस्य सुख्यातिः। महाभारतस्य वनपर्वतः वस्तु संगृह्य अष्टादशसर्गेषु विनिर्मितमिदमन्यतममेकं महाकाव्यम्। काव्यस्यास्य सम्बन्धे टीकाकारः मल्लिनाथः लिखति –

'नेता मध्यमपाण्डवो भगवतो नारायणस्यांशजः।
तस्योत्कर्षकृते नु वर्ण्यचरितो दिव्यः किरातः पुनः।।
शृङ्गारादिरसोऽङ्गमत्र विजयी वीरः प्रधानो रसः।
शैलोद्यानि च वर्णितानि बहुशो दिव्यास्त्रलाभः फलम्।।' इति।

सर्वशास्त्रेषु लब्धज्ञानी भारविः अस्मिन् काव्ये स्वल्पं वस्तु आधारीकृत्य महती एका काव्यसम्पद् सृजति। काव्येऽस्मिन् वनेचरमुखाद् दुर्योधनशासनवृत्तान्तवर्णनं, द्रौपदीवाक्यं, भीमगर्जनं, युधिष्ठिरस्य नीतियुक्तवचनं, अर्जुनप्रस्थानसमये द्रौपदीवाक्यं, शरद्वर्णनं, हिमालयवर्णनं, गन्धर्वाप्सरसां विलासवर्णनं, उद्यानजलक्रीडा, सायंचन्द्रोदय-सुरत-प्रभातादिवर्णनं, शिवार्जुनयोः युद्धवर्णनं, चोत्तरोत्तरं प्रातिस्विकोत्कर्षं जनयन्ति। काव्येऽस्मिन् कविना कल्पनायाः यत् सूक्ष्मजालं विस्तार्यते तत् कुत्रापि किञ्चिदपि काव्यस्य अपकर्षं न जनयति। काव्ये तस्य भावानुग्राहिशब्दप्रयोगः, अर्थगौरवम्, उदात्तकल्पना च प्रत्येकसर्गेषु दरीदृश्यते। सर्वान् रसान् छन्दांसि च अत्र तेन महता यत्नेन प्रयुज्यते। तस्य भाषायां माधुर्यप्रौढतयोरपूर्वः समन्वयो दृश्यते। अनकैरुच्यते स खलु शब्दस्य ऐन्द्रजालिकः। एकेनैव वर्णेन समग्रश्लोकस्य रचना अतिविस्मयकरः यथा –

'न नोननुन्नो नुन्नोनो नाना नानानना ननु।
नुन्नोऽनुन्नो ननुन्नेनो नानेनानुन्ननुन्ननुत्॥' इति ।

अपि च द्व्याक्षरेण यथा –

'चारचञ्चुश्चिरारेची चञ्चच्चीररुचारुचः।
चचार रुचिरश्चारु चारैराचारचञ्चुरः।।' इति।

चित्रकाव्यरचनायाम् अपि तस्य प्रतिभा महाकाव्येऽस्मिन् परिस्फुटति यथा-

'स्फुटता न पदैरपाकृता न च न स्वीकृतमर्थगौरवम्।
रचिता पृथगर्थतां गिरां न च सामर्थ्यमपोहितं क्वचित्।।' इति।

अर्थगौरवविशिष्टपद्यरचनायां तस्य तुल्यः सिद्धजनः दुष्करः। सामान्यवचनेन व्यापकस्य विवृतिः अर्थगौरवस्य मूलम्, तस्य प्रयोगः तेन उपयुक्ततयैव कृतः यथा – 'न हि प्रियं प्रवक्तुमिच्छन्ति मृषा हितैषिणः', 'हितं मनोहारि च दुर्लभं वचः', 'स किंसखा साधु न शास्ति योऽघिपं हितान्न यः संश्रृणुते स किम्प्रभुः', 'समुन्नयन् भूतिमनार्य सङ्गमाद् वरं विरोधऽपि समं महात्मभिः', 'अहो दुरन्ता वलवद् विरोधिता', 'सहसा विदधीत न क्रियाम् अविवेकः परमापदां पदम्', 'व्रजन्ति ते मूढधियः पराभवं भवन्ति मायाविषु ये न मायिनः' चेति।

यतो हि अस्य काव्यस्य प्रधानोद्देश्यः प्रतिशोधः इति अतः भरविना अत्र वीररसः मुख्यतया उपस्थाप्यते। अपि च सृङ्गाररसः गौणरूपेण प्राप्यते। यथा सुबन्धुवाणाभ्यां गद्यरचनायाः कृते विशेषः नियमः निर्धारितः तद्वत् भारविना विशेषनियमस्य कथा महाकाव्यस्य चतुर्दशसर्गे एकश्लोकमाध्यमेन उच्यते यथा-

'विविक्तवर्णा भरणा सुखश्रुतिः प्रसादयन्ति हृदयन्यपि द्विवाम्।
प्रवर्ततेनकृतपुण्यकर्मणाम् प्रसन्नगंभीरपदा सरस्वती।।' इति।

केचित् जनाः सन्ति ये काव्येषु अर्थगौरवाणां प्रशंसा कुर्वन्ति अपि च केचित् काव्येषु शाब्दिकसौन्दर्याणां प्रशंसा कुर्वन्ति। अतः अर्थगौरवशाब्दिकसौन्दर्यसमन्बितायाः रचनायाः निर्माणम् एकं कठिनं कार्यम् इति लोकरुचिः प्रकटयता भरविना उच्यते –

'स्तुवन्ति गुर्वोमभिधेय सम्पदं विशुद्धिमुक्तेरपरे विपश्चितः।
इति स्थितायां प्रतिपूरुषं रुचौ सुदुर्लभाः सर्वमनोहरा गिरः।।' इति।

छन्दःप्रयोगेऽप्यस्य महत्कौशलं दृश्यते। तस्य वंशस्थचारुत्वं प्रशंसन् क्षेमेन्द्रः कथयति -

'वृत्तच्छत्रस्य सा काऽपि वंशस्थस्य विचित्रता।
प्रतिभा भारवेर्येन सच्छायेनाधिकीकृता ।।' इति।

कविभारवेः व्याकरणज्ञानं तु पाणिन्यनुसारिः। काव्ये कुत्रापि अपाणिनीयप्रयोगः न दृश्यते। यथा तेन अनद्यतने  लङ् प्रयुज्यते, न लुङः। परोक्षातीतकाले लिट् प्रयुज्यते चेति। अतः अन्तिमे एतत् वक्तुं शक्यते भारवेः काव्ये कलापक्षस्य भावपक्षस्य च उभयोः महत्वं विद्यते। शब्दार्थौ सहितौ काव्यम् तत्र उभयोः प्राधान्यं समानम्। भारवेः काव्ये वैदर्भीरीतिः, अर्थगौरवत्वं, समुचितशब्दचयनः चेति मुख्यतया प्रकाश्यते। यस्य प्रभावः उत्तरवर्तिकवीनां रचनासु अनुकृष्यते इति शम्।

******************************

GGDC SALBONI